॥ चतुर्थोऽध्यायः ॥

विष्णुर्ब्रह्म तथा दातॆत्यॆवं नित्यमुपासनम् ।
कार्यमापद्यपि ब्रह्म तॆन यात्यपरॊक्षताम् ॥ १ ॥

प्रारब्धकर्मणॊऽन्यस्य ज्ञानादॆव परिक्षयः ।
अनिष्टस्यॊभयस्यापि सर्वस्यान्यस्य भॊगतः ॥ २ ॥

उत्तरॆषूत्तरॆष्वॆवं यावद्वायु विमुक्तिगाः ।
प्रविश्य भुंजतॆ भॊगांस्तदंतर्बहिरॆव वा ॥ ३ ॥

वायुर्विष्णुं प्रविश्यैव भॊगश्चैवॊत्तरॊत्तरम् ।
उत्क्रम्य मानुषा मुक्तिं यांति दॆहक्षयात् सुराः ॥ ४ ॥

अर्चिरादिपथा वायुं प्राप्य तॆन जनार्दनम् ।
यांत्युत्तमा नरॊच्चाद्या ब्रह्मलॊकात् सहामुना ॥ ५ ॥

यथासंकल्पभॊगाश्च चिदानंदशरीरिणः ।
जगत्सृष्ट्यादिविषयॆ महासामर्थ्यमप्यृतॆ ॥ ६ ॥

यथॆष्टशक्तिमंतश्च विना स्वाभाविकॊत्तमान् ।

www.joysigma.com

अनन्यवशगाश्चैव वृद्धिह्रासविवर्जिताः ।
दुःखादिरहिता नित्यं मोदंतेऽविरतं सुखम् ॥ ७ ॥

पूर्णप्रज्ञेन मुनिना सर्वशास्त्रार्थसंग्रहः ।
कृतोऽयं प्रीयतां तेन परमात्मा रमापतिः ॥ ८ ॥

नमो नमोऽशेषदोषदूरपूर्णगुणात्मने ।
विरिंचिशर्वपूर्वेड्यवंद्याय श्रीवराय ते ॥ ९ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचित ब्रह्मसूत्राणुभाष्ये चतुर्थोऽध्यायः ॥

॥ इति श्रीमदणुभाष्यम् ॥

www.yousigma.com